**सलिलकुन्तल** पु० सलिलस्य कुन्तल इव । शैवाले त्रिका० ।

**सलिलज** न० सलिले जायते जन-ड । १पद्मे राजनि० । २जलजातमात्रे त्रि० ।

**सलिलनिलय** पु० सलिलं निलयो यस्य । १जलचरे २मीनकर्कटराशौ च "सलिलनिलयाभस्था वस्याः सरीसृपजातयः" ज्यो०त० ।

**सलिलराशि** पु० ६त० । समुद्रे सलिलनिध्यादयोऽप्यत्र ।

**सलिलेन्धन** पु० सलिलमिन्धनमिव दाह्यं यस्य । बड़वानले त्रिका० ।

**सल्लकी** स्त्री शल-वुन् लुक्च पृषो० शस्य सः गौरा० ङीष् । शल्लक्यां गजभक्ष्यायाम् अमरे पाठान्तरम् ।

**सव** पु० सूयते सु-अच् । १यज्ञे अमरः । २सन्ताने मेदि० । अच् । ३सूर्य्ये ४अर्कवृक्षे ५जले न० जटा० ।

**सवन** न० सु-सू-वा ल्युट् । १यज्ञाङ्गे २स्नाने अमरः । सोमनिष्पीड़ने ४अभिषवे अमरः ५सोमपाने भरतः । ६यज्ञे ७प्रसवे च दमन्यसन्धाने । यज्ञियसवनानि च त्रीणि प्रातर्मध्यतृतीयभेदात् । "हवींषि निर्वपत्याग्नेयमैन्द्रं वैश्वदेवं चरुं सवनकालेष्वेकैकम्" कात्या०श्रौ०२४।७।५। सू० "क्रुतएतत् आग्नेयं प्रातःसवनम्, ऐन्द्रं माध्यन्दिनसवनम्, वैश्वदेवं तृतीयसवनमित्यर्थवादात्" । "प्रातर्मध्यन्दिनापराह्णेषु एकैकं हविर्निर्वपति" कर्कः ।

**सवयस्** त्रि० समानं वयो यस्य समानस्य सः । वयस्ये अमरः "सवयोभिरन्वितः" इति रघुः ।

**सवर्ण** पु० समानो वर्णो यस्य । १तुल्यरूपे हेमच० २एकजात्याश्रये यथा विप्रस्य विप्रजातिः क्षत्रियस्य क्षत्रियजातिः "तुल्यास्यप्रयत्नं सवर्णमिति" पा० उक्ते स्थानप्रयत्नाभ्यां ३तुल्ये वर्णे च यथा ककारस्य स्थानेन तुल्यो गकारादिः, प्रयत्नसाम्येन तकारस्य चकारादिः, जकारस्य सकारः सकारस्य षकारः । हकारस्य वर्ग्यास्तुर्या वर्णाः । सह वर्णेन । ४वर्णसहिते त्रि० ।

**सवर्णन** न० सवर्ण+कृतौ णिच्-भावे ल्युट् । तुल्यरूपतासम्पादने "अंशसवर्णनं स्यात्" लीला० ।

**सवहा** स्त्री सह वहेन । त्रिवृतायां भरतः ।

**सवासस्** त्रि० सह वाससा । १वस्त्रत्यागविरुद्धस्नाने वेगवति "सवासा जलमाप्लुवेत्" स्मृतिः ।

**सविकल्पक** न० सह-विकल्पेन कप् । वेदान्तोक्ते ज्ञातृज्ञेयभेदादिकल्पनासहिते १समाधिभेदे न्यायोक्ते एकस्मिन् धर्मिण्यपरसंसर्गावगाहिनि २ज्ञानभेदे च पात०उक्ते सम्प्रज्ञाते ३समाधिभेदे असम्प्रज्ञातशब्दे ४७० पृ० दृश्यम् । निर्विकल्पकशब्दे ४१०३पृ० दृश्यम् ।

**सविकाश** त्रि० सह विकाशेन । १प्रफुल्ले विकशिते २असङ्कोचे च "जगन्ति यस्यां सविकाशमासत" माघः ।

**सविचारा** स्त्री पात० उक्ते समापत्तिरूपसमाधिभेदे निर्विचारशब्दे ४१०३ पृ० दृश्यम् ।

**सवितर्का** स्त्री पात० उक्ते समापत्तिरूपसमाधिभेदे "तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः" सू० "तद्यथा गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यविभागेन विभक्तानामपि ग्रहणं दृष्टं विभज्यमानाश्चान्ये शब्दधर्मा अन्येऽर्थधर्मा अन्ये विज्ञानधर्मा इत्येतेषां विभक्तः पन्थाः, तत्र समापन्नस्य योगिनो योगवाह्यार्थः समाधिप्रज्ञायां समारूढः स चेत् शब्दज्ञानविकल्पानुविद्ध उपावर्त्तते सा सङ्कीर्णा समापत्तिः सवितर्केत्युच्यते । यदा पुनः शब्दसङ्केतस्मृतिपरिशुद्धौ श्रुतानुमानज्ञानविकल्पशून्यायां समाधिप्रज्ञायां स्वरूपमात्रेणावस्थितोऽर्थस्तत्स्वरूपाकारमात्रतयैवावच्छिद्यते सा च निर्वितर्का समापत्तिः तत् योगिनां परं प्रत्यक्षं, तच्च श्रुतानुमानयोर्बीजं ततः श्रुतानुमाने प्रभवतः । न च श्रुतानुमानज्ञानसहभूतं तद्दर्शनं तस्मादसङ्कीर्णं प्रमाणान्तरेण योगिनो निर्वितर्कसमाधिजं दर्शनमिति" भा० ।

**सवितृ** पु० सू-तृच् । १जगत्स्रष्टरि परमेश्वरे "तत्सवितुर्वरेण्यमि"ति श्रुतिः । २सूर्य्ये ३अर्कवृक्षे अमरः । ४तद्दैवताके हस्तनक्षत्रे ज्यो० । ५मातरि स्त्री हेमच० ङीप् । सवितुरिदं घ सवित्रिय तत्सम्बन्धिनि त्रि० । स देवताऽस्य अण् । सावित्र तद्दैवताकचर्वादौ त्रि० स्त्रियां ङीप् ।

**सविध** त्रि० सह विध्यति विध-क सहस्य सः । १निकटे अमरः "सविधेऽपि न सूक्ष्मसाक्षिणी" नैषधम् । सह विधया । २प्रकारयुते ३विधानयुक्ते च त्रि० ।

**सविस्मय** त्रि० सह विस्मयेन । विस्मयापन्ने हारा० ।

**सवीज** पु० पात० उक्ते समाधिभेदे "ता एव सवीजः समाधिः" सू० "तास्चतस्रः समापत्तयो बहिर्वस्तुवीजा इति समाधिरपि सवीजः तत्र स्थूलेऽर्थे सवितर्का निर्वितर्का सूक्ष्मेऽर्थे सविचारनिर्विचारे इति चतुर्द्धोपसंख्यातः समाधिरिति" भा० [२वीजान्विते धरणिः ।

**सवेश** त्रि० विशत्यत्र वेशो देशः सह वेशेन । १निकटे अमरः